दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-180 | 1 | अप्रैल 22, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् वैशाखशुक्लषष्ठी
बैशाख 09 प्रविष्ठांशः मङ्गलमयः भवेत्

2 'शाहनहर' कार्यालयः मण्डीतः पुनः फतेहपुरं गमिष्यति, ३० जून पर्यन्तं सीबीएसई- विद्यालयेषु भविष्यति शिक्षकाणां नियुक्तिः- मुख्यमंत्री सुक्खुः

3 HP ELECTION UPDATES- हिमाचलप्रदेशे नगर-निकायानां नगरनिगमानां च निर्वाचनस्य घोषणा, आचारसंहिता प्रवृत्ता

4 केरलराज्यस्य मध्य-तृश्शूरमण्डले विस्फोटकनिर्माणशालायां जाते विस्फोटे द्वादश (१२) जनाः मृताः, बहवः च अन्ये आहताः

## अमेरिका-ईरान-देशयोः मध्ये युद्धविरामः अद्य समाप्यते



अमेरिका-ईरान-देशयोः मध्ये युद्धविरामः अद्य सायङ्काले समाप्यते । उभयपक्षयोः मध्ये पुनः वार्तालापस्य सम्भावनायाः विषये, होर्मुज़-जलसन्धेः भविष्यस्य विषये च अनिश्चितता अस्ति। अमेरिकादेशस्य राष्ट्रपतिः डोनल्ड्-ट्रम्पः अवदत् यत् युद्धविरामस्य विस्तारः असम्भवः वर्तते । यदि सहमतिः न भवति तर्हि युद्धविरामस्य अनन्तरं आक्रमणानि पुनः आरप्स्यन्ते इति सः अवदत् । अमेरिकादेशस्य उपराष्ट्रपतिः जे. डी. वेन्स् प्रथम चरणस्य वार्तायाः नेतृत्वं कुर्वतः, वार्तालापार्थं इस्लामाबाद-नगरं गमिष्यति। राष्ट्रपतिः ट्रम्प-वर्यः सङ्केतं प्रायच्छत् यत् सः स्वयमेव नियमैः सह वार्तालापं करिष्यति, यदि कापि प्रगतिः भवति तर्हि सः वरिष्ठैः इरानीयैः नेतृभिः सह मिलितुं इच्छति । परन्तु ईरान्-देशात् मिश्रसङ्केतानि प्राप्तानि। ईरानः सोमवासरे रात्रौ अमेरिकादेशेन सह वार्तालापं कर्तुं सहमतः अभवत्, परन्तु अधिकारिणः अद्यापि सहभागित्वस्य पुष्टिं न कृतवन्तः ।

## राष्ट्रपतिः,उपराष्ट्रपतिः, प्रधानमन्त्री,गृहमन्त्री च नागरिकसेवा-दिवसस्य अवसरे सर्वेभ्यः नागरिकसेवकेभ्यः शुभाशयाः प्रेषितवन्तः




राष्ट्रपतिः द्रौपदीमुर्मूवर्या, उपराष्ट्रपतिः सी. पी. राधाकृष्णन, प्रधानमन्त्री नरेन्द्रमोदी, गृहमन्त्री अमितशाहः च नागरिकसेवा-दिवसस्य अवसरे सर्वेभ्यः नागरिकसेवकेभ्यः शुभाशयाः प्रेषितवन्तः। सामाजिक सञ्चालीय-संदेशे राष्ट्रपतिः अवदत् यत् उत्तरदायी-शासनस्य सुदृढीकरणाय, सार्वजनिक-संस्थानां सुदृढीकरणाय च नागरिक-सेवकानां प्रतिबद्धता महत्त्वपूर्णा अस्ति ।

# रक्षामन्त्री राजनाथसिंहः जर्मनी देशस्य यात्रावधौ बर्लिन-नगरं प्राप्नोत्



रक्षामन्त्री राजनाथसिंहः जर्मनी देशस्य यात्रावधौ बर्लिन-नगरं प्राप्नोत् । एकस्मिन् सामाजिक-सञ्चालीय-संदेशे, श्रीसिंह-वर्यः अवदत् यत् म्यूनिक्-नगरात् बर्लिन्-नगरं प्रति तस्य विमानयात्रा-समये सः जर्मन वायुसेनायाः विशिष्टविमानेन यात्रां कुर्वन्, युद्धकविमानैः अनुरक्षितः, बर्लिन-नगरम् आगत्य सैन्यसम्मानम् अवाप्नोत् । इतः पूर्वं से, श्रीसिंह-वर्यः जर्मनदेशस्य म्यूनिक्-नगरं प्राप्तवान् । यात्रावधौ, सः जर्मनदेशस्य समकक्षीयेन बोरिस्-पिस्टोरियस् इत्यनेन सह अन्यैः वरिष्ठनेतृभिः च सह द्विपाक्षिकं वार्तालापं करिष्यति, येन उभयदेशयोः सामरिक-रक्षा-सहभागित्वं सुदृढं भवेत् । रक्षामन्त्री जर्मन-रक्षा-उद्योगस्य प्रमुखप्रतिनिधिभिः सह अपि सम्वादं करिष्यति इति अपेक्षा अस्ति, येन मेक-इन-इण्डिया इति उपक्रमस्य अन्तर्गतं संयुक्तविकासस्य सहोत्पादनस्य च कृते प्रोत्साहनं भवेत् ।

# सरदारपटेलः सेवायाः एकतायाः च भावेन राष्ट्रम् एकीकृतवान्- उपराष्ट्रपतिः



भारतस्य उपराष्ट्रपतिः श्री. सी. पी. राधाकृष्णनवर्यः अवदत् यत् सर्वकारस्य योजना-नीतौ मूलस्तरे प्रवर्तयितुं नागरिकसेवाः महत्त्वपूर्णां भूमिकां निर्वहन्ति। नवदेहल्यां सिविल-सेवा-दिवसस्य अवसरे उप-राष्ट्रपतिः अवदत् यत् राजधान्यां देहल्यां योजनाः निर्मीयन्ते, परन्तु दूरस्थ-ग्रामेषु सार्थकाः परिणामाः तदा एव प्राप्यन्ते यदा ते यथार्थरूपेण कार्यान्विताः भवन्ति। सरदारवल्लभभाई-पटेलः अखिलभारतीयसेवानां शिल्पकारः इति वर्णयन् उपराष्ट्रपतिः अवदत् यत् सरदारपटेलः सेवायाः एकतायाः च भावेन राष्ट्रम् एकीकृतवान् । केन्द्रीय-कार्मिक-लोक-अभियोग-राज्यमन्त्री डॉ. जितेन्द्रसिंह-वर्यः अवदत् यत् प्रधानमन्त्रिणः नरेन्द्रमोदीवर्यस्य नेतृत्वे शासनक्षेत्रे क्रान्तिकारिपरिवर्तनम् अभवत् ।

# पश्चिम-एशिया-द्वन्द्वस्य मध्ये सम्पूर्ण देशे दुग्ध-क्रयणं, संस्करणं, आपूर्तिः च अविरामम् प्रचलति

सर्वकारः अवदत् यत् गृहोपभोक्तृभ्यः एल्. पी. जी. इत्यस्य आपूर्तिः सम्पूर्ण देशे सामान्या वर्तते सहैव देशे एल्. पी. जी. इत्यस्य वितरकाणां पार्श्वे अनुपलब्धतायाः कापि सूचना न प्राप्ता। पेट्रोलियम-प्राकृतिक-वात्येधन-मन्त्रालयस्य संयुक्त सचिवा सुजाताशर्मा इत्येषा नवदिल्ल्यां पश्चिम-एशियायाः वर्तमानविकासविषये अन्तर्मन्त्रालयीयं विवरणम् उद्दिश्य सम्बोधयन्ती अवदत् यत् अन्ताराष्ट्रियविपण्याम् अशोधिततलस्य, एल्. पी. जी. इत्यस्य च मूल्यानि वर्धितानि चेदपि सर्वकारः निर्बाधं एल्. पी. जी. इत्यस्य आन्तरिकापूर्तिं सुनिश्चेतुं प्रयतमानः अस्ति । प्रसारमाध्यमान् सम्बोधयन्ती, पशुपालन-दुग्धव्यवसायविभागस्य निदेशिका पूजा-रस्तोगी इत्येषा दृढतया उक्तवती यत् पश्चिम-एशिया-द्वन्द्वस्य मध्ये सम्पूर्ण देशे दुग्ध-क्रयणं, संस्करणं, आपूर्तिः च अविरामम् प्रचलति। सा अवोचत् यत् दुग्धस्य तस्य उत्पादानां च मूल्यं स्थिरम् अस्ति तथा च विपण्यां किमपि व्यवधानम् न अभवत् ।

## सुभाषितम्

**स अर्थो यो हस्ते,
तन्मित्रं यन्निरन्तरं व्यसने।
तद्रूपं यद्गुणाः,
तद्विज्ञानं यद्धर्मः।।**

भावार्थः- ही सच्चा धन है जो अपने अधिकार में हो, वही सच्चा मित्र है जो विपत्ति में भी साथ दे। रूप तभी शोभा देता है जब व्यक्ति गुणवान भी हो तथा वही विज्ञान सही है जो धर्म के सिद्धान्तों के अनुसार समाज के हित के लिए हो।

दैनिक ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## तमिलनाडु-राज्ये विधानसभा-निर्वाचनस्य, पश्चिमबङ्गाले च प्रथम-चरणस्य प्रचारः समाप्तिमवाप्नोत्



तमिलनाडु-राज्ये विधानसभा-निर्वाचनस्य, पश्चिमबङ्गाले च प्रथम चरणस्य प्रचारः गतसायं समाप्तिमवाप्नोत् । ध्यातव्यं वर्तते यत् तमिलनाडुराज्ये चतुस्त्रिंशदधिक-द्विशत-क्षेत्रेषु, पश्चिमबङ्गाले द्वापञ्चाशदुत्तरशतं क्षेत्रेषु च अप्रैल-मासस्य त्रयोदश-दिनाङ्के प्रथमचरणे मतदानं भविष्यति ।

# 'शाहनहर' कार्यालयः मण्डीतः पुनः फतेहपुरं गमिष्यति, ३० जून पर्यन्तं सीबीएसई- विद्यालयेषु भविष्यति शिक्षकाणां नियुक्तिः- मुख्यमंत्री सुक्खुः







हिमसंस्कृतवार्ताः- काङ्ग्ड़ा।मुख्यमन्त्री सुखविन्दरसिंहसुक्खुमहोदयः काङ्ग्ड़ा- जनपदस्य फतेहपुर-विधानसभाक्षेत्रे औद्योगिकक्षेत्रस्य निर्माणार्थं १० कोटिरूप्यकाणि प्रदातुं घोषणाम् अकरोत्। तेन उक्तं यत् 'शाहनहर' परियोजनायाः मुख्य-अभियन्ता-कार्यालयः, यः पूर्वं फतेहपुरतः मण्डीनगरं स्थानान्तरितः आसीत्, सः अधुना पुनः फतेहपुरे एव स्थापयिष्यते। मुख्यमन्त्रिणा क्षेत्रस्य महिलामण्डलेभ्यः २०-२० सहस्ररूप्यकाणां साहाय्यं तथा च 'वजीर राम सिंह' क्रीडाङ्गणस्य (स्टेडियम) जीर्णोद्धारार्थं ५० लक्षरूप्यकाणि प्रदातुम् अपि घोषणा कृता।

फतेहपुरस्य 'जखबड़' स्थाने आयोजितां विशालां जनसभां सम्बोधयन् मुख्यमन्त्री अवदत् यत् स्थानीयविधायकः भवानी सिंह पठानिया जनसेवार्थं सार्ध-द्विकोटिरूप्यकाणां (२.५ कोटि) वृत्तिं त्यक्त्वा राजनीति-मार्गं चितवान्। सः अवदत् यत् पठानिया स्वक्षेत्रस्य जनानां समस्याः सम्यक् जानाति तथा च तेषां विकासाय समर्पितः अस्ति।

## आर्थिकस्थितेः विषये पूर्वतनसर्वकारस्य आलोचना

मुख्यमन्त्रिणा उक्तं यत् पूर्वतन-भाजपासर्वकाराय वर्तमानसर्वकारस्य तुलनायां प्रायः ६० सहस्रकोटिरूप्यकाणि अधिकानि प्राप्तानि आसन्। तेन सूचितं यत् पूर्वसर्वकाराय राजस्वहानि- अनुदानरूपेण ५४ सहस्रकोटिरूप्यकाणि तथा 'जीएसटी' (GST) प्रतिपूर्तिरूपेण १६ सहस्रकोटिरूप्यकाणि मिलितानि, यदा तु वर्तमानसर्वकाराय केवलं १७ सहस्रकोटिरूप्यकाणि एव प्राप्तानि। तेन आरोपः कृतः यत् पूर्वतनसर्वकारेण निविदाकारेभ्यः (ठेकेदारों को) लाभं प्रदातुं प्रायः एकसहस्रकोटिरूप्यकाणां व्ययेन भवनानि निर्मितानि, यानि अद्यापि रिक्तानि सन्ति।सः अवदत् यत् आर.डी.जी. (RDG) स्थगनेन प्रदेशस्य प्रतिवर्षं ८ तः १० सहस्रकोटिरूप्यकाणां हानिः जाता। भाजपा केवलं चर्चायै असम्बद्धानि वचनानि करोति, स च पक्षः आन्तरिकरूपेण पञ्चसु दलेषु विभक्तः अस्ति। तेन आरोपः कृतः यत् पूर्वतनसर्वकारस्य काले 'हिमकेयर' (Himcare) योजनायां अनियमनानि अभवन्, अत्र तु पुरुषाणाम् अपि 'ओवरी' (Ovary) शल्यक्रियाः दर्शिताः। राज्यसर्वकारेण अस्य प्रकरणस्य अन्वेषणाय आदेशाः दत्ताः।

## शिक्षाक्षेत्रे विकासः तथा ३० जून पर्यन्तं नियुक्तयः

मुख्यमन्त्रिणा उक्तं यत् पूर्वतनसर्वकारस्य काले शिक्षायाः स्तरः पतितः आसीत् तथा च २०२१ वर्षे हिमाचलः गुणात्मकशिक्षायां २१ तमे स्थाने आसीत्। वर्तमानसर्वकारस्य प्रयासैः हिमाचलः अधुना देशे पञ्चमं (५) स्थानं प्राप्तवान्। सः अवदत् यत्

> गते वर्षात् प्रथम-कक्षायाः एव आङ्ग्लमाध्यमस्य आरम्भः कृतः।

> १५१ विद्यालयाः सीबीएसई (CBSE) पद्धतौ आनीताः।

> ३० जून दिनाङ्कपर्यन्तं एतेषु सर्वेषु विद्यालयेषु शिक्षकाणां नियुक्तिः पूर्णा भविष्यति, यदर्थं राज्यस्तरे चयनप्रक्रिया प्रचलति।

> सर्वकारः इच्छति यत् शुल्कस्य नाम्ना छात्रेषु कोऽपि भेदभावः न भवेत्।

## स्वास्थ्यं ग्रामीण-अर्थव्यवस्था च-

मुख्यमन्त्रिणा उक्तं यत् प्रत्येकं विधानसभाक्षेत्रे 'आदर्श-स्वास्थ्यसंस्थाः' निर्मिताः। फतेहपुर- संस्थायाम् अष्ट (८) विशेषज्ञचिकित्सकाः उपलब्धाः सन्ति। ग्रामीण-अर्थव्यवस्थां सुदृढं कर्तुं सर्वकारः प्राकृतिकोत्पादितां हरिद्रां १५० रूप्यकाणि प्रति किलोग्राम दरेण क्रेष्यति। गोदुग्धं ६१ रूप्यकाणि तथा माहिषं ७१ रूप्यकाणि प्रति लीटर दरेण क्रीणीते। काङ्ग्ड़ा-जनपदस्य ढगवारक्षेत्रे २०० कोटिरूप्यकाणां व्ययेन आधुनिक- दुग्ध- प्रसंस्करण- संयन्त्रं स्थाप्यते। मत्स्यपालकेभ्यः 'न्यूनतम- समर्थनमूल्यं' प्रदास्यते। वर्षाकाले मत्स्यग्रहण-प्रतिबन्धे ३,५०० रूप्यकाणि 'सम्मान राशिः' दास्यते।

## अनाथ-विवाहित-एकलनारीणां कल्याणम्

मुख्यमन्त्री अवदत् यत् सर्वकारः अनाथबालकानां, विधवा महिलानाम्, एकलनारीणां च कल्याणायापि कटिबद्धः अस्ति। अतिदरिद्रपरिवाराणां कृते 'अपना परिवार- सुखी परिवार योजना' इति आरब्धा, यस्याः अन्तर्गतं पात्राभ्यः महिलाभ्यः १५०० रूप्यकाणि प्रतिमासं पेन्शनं तथा ३०० यूनिट् पर्यन्तं निःशुल्का विद्युत् प्रदास्यते।

राज्ययोजनामण्डलस्य उपाध्यक्षः भवानी सिंह पठानिया महोदयः सर्वकारस्य कृतज्ञतां प्रकटयन्तः अवदन् यत् नूतनसेतुनिर्माणेन क्षेत्रस्य विकासे महती सहायता भविष्यति। तेन उक्तं यत् फतेहपुरे बस-स्थानकस्य, 'सिविल जज कोर्ट' इत्यस्य तथा 'लघु सचिवालयस्य' कार्याणि वेगेन प्रचलन्ति।

# उपराष्ट्रपतिः, प्रधानमन्त्री, वित्तमन्त्री च आदिशङ्कराचार्यस्य

## जन्मवार्षिकदिने श्रद्धाञ्जलिम् अर्पितवन्तः



उपराष्ट्रपतिः सी.पी. राधाकृष्णन, प्रधानमन्त्री नरेन्द्रमोदी, वित्तमन्त्री निर्मला सीतारमनः भारतस्य महतः आध्यात्मिकस्य प्रकाशकस्य आदिशङ्कराचार्यस्य जन्मवार्षिकदिने श्रद्धाञ्जलिम् अर्पितवन्तः । सामाजिक सञ्जालीय-माध्यमे उपराष्ट्रपतिः अवदत् यत् आदिशङ्कराचार्यः सनातनधर्मस्य कालातीतं ज्ञानं पुनरुत्थापितवान् । सः अवदत् यत् आदिशङ्कराचार्यस्य उपदेशाः जनान् ज्ञानम् अनुसरणं कर्तुं, सत्यं समर्थयितुं, स्वजीवने अनुकम्पां वर्धयितुं च प्रेरयन्ति। आदिशङ्कराचार्यस्य गहनः उपदेशः, विचारः, अद्वैतवेदान्तस्य दर्शनः च वैश्विकरूपेण असंख्याकान् जनान् निरन्तरं मार्गदर्शयन् अस्ति इति प्रधानमन्त्रिणा मोदिवर्येण सामाजिक-सञ्जालीय-संदेशे उक्तम्। वैश्विक एकता-महोत्सवं दृश्यश्रव्य-माध्यमेन सम्बोधयन्, श्रीमती सीतारमन अवदत् यत्, स्वकीयानां द्वात्रिंशद्वर्षाणाम् अल्पे जीवने, शङ्करः देशस्य उत्तर-पूर्व-दक्षिण-पश्चिम-प्रदेशेषु मठचतुष्टयम्, दशनामी सम्प्रदायः चेत्यादीनि अस्थापयत् ।

# सेनाध्यक्षः जनरल-उपेन्द्र-द्विवेदिः

## संयुक्तराज्यामेरिका-सेना-प्रशान्तप्रदेशस्य गार्ड-आफ्-आनर् इति सम्मानम् अवाप्नोत्



सेनाध्यक्षः जनरल-उपेन्द्र-द्विवेदिः संयुक्तराज्यामेरिका-सेना-प्रशान्तप्रदेशस्य वर्तमानयात्रायाः अवधौ, हवायी-नगरस्य फोर्ट-शाफ्टर् इत्यत्र गार्ड-आफ्-आनर् इति सम्मानम् अवाप्नोत्। जनरल-द्विवेदिवर्यः अमेरिकादेशस्य सेना-प्रशान्तप्रदेशस्य प्रमुखेन रोनाल्ड-पी.-क्लार्क इत्यनेन अन्यवरिष्ठनेतृभिः च सह चर्चाम् अकरोत्, या भारत-अमेरिकादेशयोः रक्षा-सहयोगं सुदृढं कर्तुं, भारत-प्रशान्तप्रदेशे शान्तेः स्थिरतायाः च कृते सहभागिदृष्टिं प्रवर्धयितुं च केन्द्रिता आसीत्।

# भारतीयसेना पहलगाम-आतङ्की-आक्रमणस्य प्रथमवार्षिकोत्सवस्य पूर्वसन्ध्यायाम् आतङ्कवादविरुद्धं दृढसङ्कल्पं प्रकटितवती



भारतीयसेनया पहलगाम-आतङ्की-आक्रमणस्य वर्षपूर्तेः पूर्वसन्ध्यायाम् आतङ्कवादस्य विरुद्धं युद्धे स्वकीयं दृढनिश्चयं पुनरुद्घोषितम्। गतवर्षस्य २२ एप्रिल् दिनाङ्के जम्मू-कश्मीरस्य पहलगामक्षेत्रे आतङ्कवादिभिः २६ निर्दोषाणां हत्या कृता आसीत्, येषु अधिकांशतः पर्यटकाः आसन्। अस्मिन् जघन्यकृत्येन सम्पूर्णः देशः स्तब्धः जातः, विश्वस्य विभिन्नानां सर्वकाराणां नेतृणां च पक्षतः अस्य तीव्रनिन्दा कृता। पहलगाम-आक्रमणस्य उत्तरं दातुं भारतीयसशस्त्रबलैः 'ऑपरेशन सिन्दूर' इत्याख्यं अभियानं प्रारब्धम् आसीत्। सेनया सामाजिक-माध्यमेषु (सोशल मीडिया) सन्देशं प्रसार्य आतङ्कवादस्य अपराधिनः प्रति कठोरां चेतावनीं दत्तवती अस्ति। सेनया उक्तं यत्— "यदा मानवतायाः सीमाः उल्लङ्घ्यन्ते, तदा प्रत्युत्तरं निर्णायकं भवति।" सामाजिक-माध्यमस्य अस्मिन् सन्देशे 'ऑपरेशन सिन्दूर' इत्यस्य उल्लेखं कुर्वता एकं 'डिजिटल पोस्टर' अपि साझाकृतम्, यस्मिन् लिखितम् अस्ति— "काश्चन सीमाः कदापि न उल्लङ्घनीयाः।"

# भारतीय-ऋतुविज्ञानविभागेन हरियाणा, चण्डीगढ, दिल्ली, पञ्जाब, पूर्वराजस्थान, छत्तीसगढ़, विदर्भ चेत्यादिषु स्थानेषु आगामिदिवसद्वये उष्णतरङ्गाणां सञ्चरणम् अनुमितम्

भारतीय-ऋतुविज्ञानविभागेन हरियाणा, चण्डीगढ, दिल्ली, पञ्जाब, पूर्वराजस्थान, छत्तीसगढ़, विदर्भ चेत्यादिषु स्थानेषु आगामिदिवसद्वये उष्णतरङ्गाणां सञ्चरणम् अनुमितम् । आकाशवाण्या सह जाते सम्वादे ऋतुविज्ञानविभागस्य वरिष्ठवैज्ञानिकः अखिलश्रीवास्तवः अकथयत् यत् भारतस्य पूर्ववर्तिक्षेत्रेषु विशिष्टतया पश्चिमबङ्गाले बिहारराज्ये च उष्णतरङ्गाणां सञ्चरणस्य आशङ्का वर्तते ।

# HP ELECTION UPDATES- हिमाचलप्रदेशे नगर-निकायानां नगरनिगमानां च निर्वाचनस्य घोषणा, आचारसंहिता प्रवृत्ता




हिमसंस्कृतवार्ताः- शिमला।हिमाचलप्रदेशस्य ५१ नगर-निकायानां निर्वाचनानि १७ मई २०२६ दिनाङ्के भविष्यन्ति। राज्य- निर्वाचन- आयुक्तः अनिलखाची महोदयः मङ्गलवासरे चतुर्णां नगरनिगमानां (सोलन- मण्डी- धर्मशाला- पालमपुराणां) सहितानां ४७ नगरपञ्चायत- नगरपरिषदां च निर्वाचन-तिथीनां घोषणां कृतवान्। अनेन सहैव नगर-निकायेषु आचारसंहिता प्रवृत्ता जाता। अस्मिन् अन्तराले ४ नगरनिगमेषु, २५ नगरपरिषत्सु च निर्वाचनानि भविष्यन्ति। राज्य-निर्वाचन-आयुक्तः अनिलखाची शिमलायां संवाददातृसम्मेलने उक्तवान् यत् नगरनिगमैः सह २२ नगरपञ्चायतेषु अपि मतदानानि भविष्यन्ति। एतेषु १,८०,९६३ पुरुषाः तथा १,७९,८८२ महिलाः स्वमतस्य प्रयोगं करिष्यन्ति। १८ वर्षदेशीयाः १८०८ नूतनाः मतदातारः सन्ति ये प्रथमतया मतदानं करिष्यन्ति। कोऽपि मतदाता 'सारथी' एप- माध्यमेन स्वस्य स्वपरिवारस्य च नाम द्रष्टुं शक्नोति।
नामाङ्कनपत्राणि २९, ३० अप्रैल तथा २ मई (अपराह्ने ३ वादनपर्यन्तं) पूरयितुं शक्यन्ते। तेषां परीक्षणं ४ मई दिनाङ्के प्रातः १० वादने भविष्यति। नामाङ्कन-प्रत्याहरणस्य समयः ६ मई (प्रातः १० तः अपराह्ने ३ वादनपर्यन्तं) निश्चितः अस्ति। प्रत्याहरणानन्तरं तस्मिन्नेव समये निर्वाचन-चिह्नानि प्रदास्यन्ते। मतदान-केन्द्राणां सूची-प्रकाशनं २९ अप्रैल दिनाङ्के करणीयम्, यदा तु १७ मई दिनाङ्के प्रातः ७ वादनतः अपराह्ने ३ वादनपर्यन्तं मतदानं भविष्यति। नगरपञ्चायत-नगरपरिषदां मतगणना तस्मिन्नेव दिने भविष्यति, किन्तु चतुर्णां नगरनिगमानां मतगणना ३१ मई दिनाङ्के भविष्यति। अनिल-खाची महोदयः उक्तवान् यत् निगम- निर्वाचन- प्रत्याशी अधिकतमम् एकलक्षं (१,००,०००) रूप्यकाणि, नगरपरिषद्-प्रत्याशी ७५ सहस्ररूप्यकाणि तथा नगरपञ्चायत-प्रत्याशी ५० सहस्ररूप्यकाणि यावत् व्ययं कर्तुं शक्नुवन्ति।

**२७ अप्रैल दिनाङ्कात् पश्चात् एव भविष्यति पञ्चायतीराज- निर्वाचनस्य घोषणा**

अपरपक्षे, पञ्चायतीराज-संस्थानां कृते २७ अप्रैल दिनाङ्के मतदाता-सूची अन्तिमा भविष्यति। अतः सम्भावना अस्ति यत् तदनन्तरमेव पञ्चायतीराज-संस्थानां निर्वाचनानां घोषणा भवेत्। सम्प्रति केवलं नगर-निकायानां निर्वाचनानां घोषणा कृता।

**३१ मई पर्यन्तं मुख्यालयं त्यक्तुं न शक्ष्यन्ति जिलाधीशाः उपमण्डलाधिकारिणः च**

स्थानीय-निकाय-निर्वाचनानां घोषणानन्तरं राज्य-निर्वाचन-आयोगेन प्रदेशस्य सर्वे उपायुक्ताः (DC), उपमण्डलाधिकारिणः (SDM), जनपद- पञ्चायत-अधिकारिणः खण्डविकास- अधिकारिणश्च स्व-स्व-मुख्यालयेषु उपस्थिताः भवितुम् आदिष्टाः। आयोगेन स्पष्टीकृतं यत् विना अनिवार्य-कारणैः कोऽपि अधिकारी मुख्यालयं न त्यक्ष्यति। एषः निर्देशः उच्चतम-न्यायालयस्य तस्य आदेशस्य आधारेण दत्तः, यस्मिन् नगरनिकायानां पञ्चायतीराज-संस्थानां च सङ्कटनम् ३१ मई पर्यन्तं सुनिश्चितं कर्तुं कथितम् अस्ति।

# अधुना अंशकालिक-पीएचडी (Part-time PhD) कार्यक्रमस्य प्रवेशप्रक्रिया पृथक् भविष्यति, उपाधौ कश्चन भेदः न भविष्यति

**हिमसंस्कृतवार्ताः- शिमला।**हिमाचल प्रदेश विश्वविद्यालयद्वारा अंशकालिक- पीएचडी- कार्यक्रमे प्रवेशप्रक्रिया नियमित-पीएचडी- प्रवेशात् पृथक् कृत्वा नूतना व्यवस्था प्रवर्तिता अस्ति। परिशिष्टानुसारम् अंशकालिक- पीएचडी-प्रवेशः नियमित-आसनेभ्यः पृथक् अतिरिक्त-श्रेण्यां भविष्यति, याः कुल-निर्धारित- आसनेषु न गणिताः भविष्यन्ति। अयं कार्यक्रमः सामान्य-पीएचडी-प्रवेशात् भिन्नमार्गेण सञ्चालितः भविष्यति।
नूतनव्यवस्थायां विश्वविद्यालयः नियमित- आसनेषु किमपि प्रभावं विना अतिरिक्त-अभ्यर्थिनः समावेशयितुं शक्नोति। एतेन सह पर्यवेक्षकः स्वस्य निर्धारित-अधिकतम-सीमातः पृथक् एतान् शोधार्थिनः मार्गदर्शयिष्यति। विश्वविद्यालयेन एतत् शोध-अवसर-विस्ताररूपेण प्रवर्तितम् अस्ति, यत्र आसन-सीमां न वर्धयित्वा अपि प्रवेश-संख्याया वर्धनं कर्तुं शक्यते।
अंशकालिक-पीएचडी केवलं कार्यरत-अभ्यर्थिभ्यः सीमिता अस्ति, यस्य कृते अनुभवाधारित-पात्रता स्पष्टतया निर्धारिता अस्ति।नियमित-पदे कार्यरत-शिक्षकानां शोधकर्तृणां च कृते न्यूनतमं त्रिवर्षीय-अनुभवः अनिवार्यः अस्ति। अतिथि अथवा संविदा-आधारे कार्यरत-जनानां कृते एषा सीमा पञ्चवर्षीय-निर्धारिता अस्ति। अनुसंधान- विकास-संस्थाभ्यः, सार्वजनिक-उपक्रमेभ्यः वा प्रतिष्ठित-संस्थानेभ्यः सम्बद्धानां अभ्यर्थिनां कृते अपि पञ्चवर्षीय-अनुभवः अपेक्षितः अस्ति। अन्येषां व्यवसायिनां कृते सप्तवर्षीय- अनुभवः अनिवार्यः कृतः अस्ति। चयन-प्रक्रिया नियमित-पीएचडी-सदृशी एव भविष्यति।
किञ्चन सीमित-श्रेणीनां कृते निर्दिष्ट-नियमानुसारं प्रवेश-परीक्षायाः अपकर्षः प्रदत्तः अस्ति। एतेषु प्रकरणेषु विभागीयस्तरे साक्षात्कारमाध्यमेन मूल्यांकनं क्रियते। साक्षात्काराय ३०-अङ्कीयं विस्तृत- मानदण्डं निर्धारितम् अस्ति, यस्मिन् अनुभवः, NET/JRF-योग्यता, शोधप्रस्तावः, प्रस्तुति-प्रदर्शनं, तस्य संरक्षणं च अन्तर्भवन्ति। अंशकालिक-शोधार्थिनां कृते नियोक्तृ-पक्षात् अनापत्ति-प्रमाणपत्रम् अनिवार्यम् अस्ति, यस्मिन् अभ्यर्थिने पाठ्यक्रम-कार्यस्य तथा शोध-कार्यस्य कृते आवश्यकः समयः अवकाशः च प्रदास्यते इति उल्लेखनीयम्। शोध-कार्यं विश्वविद्यालय-परिसरे कार्यस्थले वा उभयत्र कर्तुं शक्यते, किन्तु कार्यस्थले आवश्यकसुविधानाम् उपलब्धिः प्रमाणयितव्या।

## उपाधौ न कश्चन भेदः-

अंशकालिक-पीएचडी तथा पूर्णकालिक-पीएचडी मध्ये उपाधौ कश्चन भेदः न भविष्यति, तथा च उभयोः कृते समान-शैक्षणिक-मानदण्डाः प्रवर्तिष्यन्ते।

# मुख्यमन्त्रिणा ज्वालामुख्यां विद्युन्मण्डल- उपमण्डल- कार्यालयभवनानां निर्माणकार्यस्य शिलान्यासः कृतः

हिमसंस्कृतवार्ताः- काङ्गड़ा। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुमहोदयः काङ्गड़ा- जनपदस्य ज्वालामुख्यां विद्युन्मण्डल- उपमण्डल- कार्यालयभवनानां निर्माणकार्यस्य तथा ३३ केवी उपकेन्द्रस्य सुदृढ़ीकरणकार्यस्य शिलान्यासम् अकरोत्। एतयोः द्वयोः विकासात्मकपरियोजनयोः अनुमानितव्ययः प्रायः ४ कोटिरूप्यकाणि अस्ति। एताभ्यां योजनाभ्यां विविधवर्गाणां, जलशक्तिविभागस्य योजनानां ३५,००० तः अधिकाः उपभोक्तारः लाभान्विताः भविष्यन्ति।
अस्मिन् अवसरे मुख्यमन्त्री ज्वालामुख्याः 'देहरियां' क्षेत्रे एकस्य अन्यस्य विद्युत्-उपमण्डलस्य उद्घाटनस्य घोषणाम् अकरोत्, यदर्थं १० कोटिरूप्यकाणां प्रावधानं कृतम् अस्ति। अनेन क्षेत्रे 'वोल्टेज' समस्यायाः समाधानं सुनिश्चितं भविष्यति तथा च उपभोक्तृभ्यः सप्ताहंयावत् निर्बाधा विद्युत्-आपूर्तिः लप्स्यते। तेन कथितं यत् क्षेत्रस्य कृते पूर्वमेव ४८ कोटिरूप्यकाणां व्ययेन नव (९) '३३ केवी' विद्युत्-उपमण्डलानां घोषणा कृता आसीत्, येषां निर्माणकार्यं विविधचरणेषु प्रगतिपथे वर्तते।
मुख्यमन्त्रिणा उक्तं यत् राज्यसर्वकारः श्रीज्वालामुखी, श्रीचिन्तपूर्णी, श्रीनैनादेवी क्षेत्रेषु च धार्मिकपर्यटनस्य विकासाय एकस्याः 'विशिष्टयोजनायाः' अन्तर्गतं कार्यं करोति। सः अवदत् यत् श्रीज्वालामुखी- श्रीनैनादेवी क्षेत्रयोः सौन्दर्यीकरणाय १५० कोटिरूप्यकाणि व्ययिष्यन्ते। प्रथमचरणे एतेभ्यः कार्येभ्यः २५ कोटिरूप्यकाणां प्रथमांशं (Instalment) प्रदातुं घोषणा कृता।
एतस्मात् पूर्वं मुख्यमन्त्री ज्वालामुखीमन्दिरे पूजा-अर्चनां कृतवान्, विविधस्थानेषु प्रचलतां सौन्दर्यीकरणकार्याणां निरीक्षणं चापि अकरोत्।स्थानीयविधायकः सञ्जय रत्नः विविध-विकासात्मक- परियोजनाभ्यः मुख्यमन्त्रिणं प्रति कृतज्ञतां प्रकटयन् अवदत् यत् वर्तमानसर्वकारस्य कार्यकालस्य अस्मिन् क्षेत्रे कोटिरूप्यकाणां विकासकार्याणि जनहिताय अर्पितानि सन्ति। अस्मिन् अवसरे विधायिका कमलेश ठाकुर, 'भूतपूर्वसैनिकनिगमः' इत्यस्य अध्यक्षः प्रबन्धनिदेशकश्च कर्नल मनीष कुमारः तथा अन्ये गण्याः उपस्थिताः आसन्।









हिमसंस्कृतवार्ता

असमप्रदेशीयः
विज्ञानशिक्षकः, नारदोपाध्यायः

# संस्कृतं मधुरं सदा -२९

मनुष्यजीवनम् इतरेषां प्राणिनां तुलनया उत्तमतमं वर्तते, इत्यत्र न सन्देहः। विवेकः, सुशिक्षा, अन्वेषणशक्तिः इत्यादिकं हि अत्र कारणं, प्रमाणञ्च। विचारशक्तेः प्रभावतः हि मनुष्यः असाध्यं कार्यमपि कर्तुमर्हः। विज्ञानशिक्षायाः आधारेण, तस्याः प्रयोगेण च मनुष्यः अद्य स्वकीयं दैनन्दिकं जीवनमपि सुखमयम्, आनन्ददायकं, सरलञ्च कर्तुं सक्षमः जातोऽस्ति। शिक्षेयं कथं लभ्येत इति विषये अत्र प्रस्तोतुं प्रयत्यते।

विद्यालय-महाविद्यालयेषु विश्वविद्यालयेषु अथवा अन्येषु शिक्षानुष्ठानेषु ये अध्ययनरताः शिशवः, युवतयः, युवानः च, ते हि छात्राः अथवा विद्यार्थिनः उच्यन्ते। विद्यार्जनं हि छात्राणां मुख्यं कर्तव्यमिति कथ्यते चेदपि विद्यार्जनेन सह तेषाम् अन्यत् सत्कार्यमपि सम्भवेत्, यच्च तैः विधातव्यम्। विशेषतः छात्रावस्था हि मानवजीवनस्य आधारस्तम्भत्वेन परिगण्यते। अतः अस्यां कालावधौ छात्राः सम्यक्तया शिक्षादीक्षादिभिः सुदक्षाः भवेयुः, भविष्यत्काले च सन्नागरिकाः भवेयुः, एवञ्च देशोन्नतिं साधयेयुः इति जनसमाजस्य मनसि सदा अपेक्षा भवति।

प्रथमतो विद्यार्जनं हि छात्राणां मुख्यलक्ष्यं तपस्या वा भवति- 'छात्राणाम् अध्ययनं तपः' इति। विद्यालय- महाविद्यालयीयं शिक्षार्जनं प्रत्येकं छात्रस्य प्राथमिकं कर्तव्यम्। छात्रदशायाः अध्ययनस्योपरि हि तस्य समग्रजीवनम् अवलम्बितं भवति। अस्यां छात्रावस्थायां छात्रमनः अत्यन्तं कोमलं भवति, यत्र नीयते तद्दिशि हि सहजतया प्रसरति। परन्तु अद्यत्वे छात्राणाम् अधिकांशछात्राः अध्ययनरूपं प्राथमिकं कर्तव्यं सुचारुरूपतया कुर्वाणाः सन्तीति नैव अवलोक्यते। उत्तीर्णतां गन्तुं परीक्षादिषु ते असाधून् उपायान् अवलम्बेयुः। एतादृशं दुष्कार्यन्तु तेषाम् आत्मप्रवञ्चनाय हि भवति केवलम्। अध्ययनावसरे आत्मानं कथं वा अध्ययनव्रतित्वेन विधातुं शक्यम् इति तद्विषये हि तैः मनोयोगः प्रदातव्यः।

शिक्षायाः साफल्यार्थम् अध्यनव्रतस्य अतिरिच्य जीवने कृतकार्यतां लब्धुम् अन्यविषयोऽपि अभ्यसनीयः स्यात् छात्रैः। वर्तमानकालिकेभ्यः छात्रेभ्यो हि भविष्यत्कालार्थं विचक्षण-राजनीतिज्ञः, सुदक्ष- प्रशासकः, सुविचारकः, आदर्श-शिक्षकः, निष्ठावान् समाजकर्मी, प्रसिद्ध-वैज्ञानिकः, महान् देशप्रेमी, परमो भगवद्भक्तः इत्यादयः महाजनाः चिताः भवेयुः। अतः छात्रदशायां हि आत्मनि सुचरित्रस्य निर्माणं कर्तव्यं छात्रैः। सुचरित्रेण हि कोऽपि जनो महान् भवितुमर्हेत्। विनम्रता, कार्य- शृङ्खलता, अध्यवसायः, प्रसन्नता, गुरुसेवा, पितृसेवा, आस्तिकता इत्यादिगुणाः छात्रान् सदा सफलतायाः दिशि प्रेरयेयुः, नयेयुः च। ज्ञानं हि वस्तुतः शक्तिः- "Knowledge is power". अतः ज्ञानप्राप्तये अध्ययनरूपा तपस्या सततम् आचरणीया विद्यार्थिभिः इति, शुभम्।



# "आद्यशङ्कराचार्य जयन्ती"

"कनकधारास्तोत्र निर्माणस्य कथा"

कस्मिंश्चित् समये शङ्कराचार्यः भिक्षार्थं दरिद्रस्य ब्राह्मणस्य गृहं गतः। 'भिक्षां देहि' इति आहूतवान्। तस्मिन् गृहे भिक्षाभोजनस्य कणिका अपि नासीत्। ब्राह्मणस्त्री तस्य भिक्षाकटोरे शुष्कम् आम्लं स्थापितवती। तस्याः दुर्दशां दृष्ट्वा शङ्कराचार्यं करुणां प्रस्रवतः। तदा सः महालक्ष्मीं प्रार्थितवान् तथा च ब्राह्मणस्त्रीपरिवारस्य दारिद्रयं दूरीकर्तुं प्रार्थितवान्। स्तोत्रप्रभावेण, शङ्कराचार्यस्य सकारात्मक शब्दप्रभावेण सुवर्णाम्लाः फलानि आकाशात् अवर्षत्। तस्य कुटुम्बस्य दारिद्रयं निवृत्तम्। एतादृशी आख्यायिका प्रसिद्धा। आर्थिकसमृद्ध्यै, कुलप्रगतेः, लक्ष्मीः गृहे स्थिरः भवितुं एतत् स्तोत्रं नित्यं पठितव्यम्।

**कनकधारास्तोत्रम्-**

**"अङ्गं हरेः पुलकभूषणमाश्रयन्ती।**
**भृङ्गाङ्गनेव मुकुलाभरणं तमालम्।।"**

एतत् अतीव सुन्दरं स्तोत्रम् अस्ति।

डॉ. वर्षा प्रकाश टोणगांवकर
पुणे / महाराष्ट्रम्




## व्यङ्ग्यात्मक-हास्यकणिका

# दूरदर्शन-साक्षात्कारः

साक्षात्कारकर्ता- भवती कियती उत्तरदायिनी अस्ति?

पत्नी- अहं तु अतीव उत्तरदायिनी अस्मि।

१. यदि मम बालकानां पठने न्यूनाः अंकाः आयान्ति, तर्हि अहमेव उत्तरदायिनी।

२. यदि मम बालाः पूर्णदिवसः दूरवाणीं पश्यन्ति, तर्हि अहमेव उत्तरदायिनी।

३. यदि मम बालेषु संस्काराः न सन्ति, तर्हि अहमेव उत्तरदायिनी।

४. यदि मम श्वशुरयोः रक्तचापः शर्करा च उच्चै भवति, तर्हि तस्याः उत्तरदायिनी अहमेव।

५. यदि मम गृहे ननान्दॄणाम् आगम-निर्गमनं निरुद्धम्, तर्हि तस्याः उत्तरदायिनी अहमेव।

६. यदि मम पत्युः स्वसम्बन्धिभिः सह कलहः भवति, तर्हि तस्याः उत्तरदायिनी अहमेव।

७. यदि मम गृहम् अस्तव्यस्तं वर्तते, तर्हि तस्याः उत्तरदायिनी अहमेव।

इतोऽपि

८. यदि मम पत्युः उदरशुद्धिः न अभवत्, तर्हि तस्यापि उत्तरदायिनी अहमेव।

अतः अहं तु अतीव उत्तरदायी (उत्तरदायिनी) व्यक्तिः अस्मि! 😥😌😳😳😳😳😳



हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

# वार्ता-संवादः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।


काव्या- नमस्ते नन्दिनि। अद्य एका विचित्रा वार्ता मया श्रुता। देलावेर-धावन-प्रतियोगितायाम् एकेन धावकेन विजयात् पूर्वमेव उत्सवः कृतः। अतः केवलं द्वयोः क्षणयोः भेदेन तस्य पराजयः जातः अस्ति।

नन्दिनी- कष्टकरः अयं विषयः, अतिहर्षः विनाशाय भवति। परन्तु शृणु, त्रयाणां वर्षाणाम् अनुभवेनैव एका महिला नव-कोटि-परिमितं वेतनं प्राप्तवती अस्ति। एतद् वृत्तं सर्वत्र विश्वजाले प्रसृतम्।

काव्या- बहु धनं लब्धं तया, एतत् तु अतीव सुखदम्। धनप्राप्तये जनाः विविधान् मार्गान् वृण्वन्ति। चीनदेशे एकया महिलया षष्टिसहस्रं विषाक्ताः सर्पाः पालिताः। तया कोटि-तः अधिकं धनम् अर्जितम्।

नन्दिनी- सर्पाणां पालनं तु अतीव भयानकम्! एतस्मात् तु सरलं जीवनं वरम्। अरुणाचल-प्रदेशे एकया महिलया स्व-गृहस्वामिने एका सम्मार्जनी उपहारीकृता। अनया सरलतया तयोः संबन्धः दृढः जातः।

# केरलराज्यस्य मध्य-तृश्शूरमण्डले विस्फोटकनिर्माणशालायां जाते विस्फोटे द्वादश (१२) जनाः मृताः, बहवः च अन्ये आहताः



केरलराज्यस्य मध्य-तृश्शूरमण्डलस्य मुण्डाथिकोडग्रामे एकस्मिन् विस्फोटकनिर्माणशालायां (अग्निबाणयन्त्रालये) जातस्य विस्फोटस्य कारणेन द्वादश (१२) जनाः मृताः, बहवः च अन्ये आहताः। मण्डलाधिकारिणी (जिला कलेक्टर) शिखा सुरेन्द्रन् वर्या मृतकानां सङ्ख्यां पुष्टीकृतवती। सा उक्तवती यत् घटनास्थलतः संप्राप्तानां देहानां विस्तृतसत्यापनेन मृतकानां स्पष्टा सङ्ख्या ज्ञास्यते। आहताः जनाः तत्क्षणमेव समीपस्थेषु चिकित्सालयेषु प्रवेशिताः सन्ति।

एषा घटना तस्मिन् कक्षे (शेड्) अभवत्, यत्र आगामिनः तृश्शूर-पूरम् उत्सवात् पूर्वं कस्यचित् मन्दिरस्य देवस्वम्-निमित्तं विस्फोटकाः सज्जीक्रियन्ते स्म। विस्फोटस्य वास्तविकं कारणं तु अद्यापि अज्ञातमस्ति। घटनायाः कारणानां अन्वेषणार्थं तथा च कस्यापि सम्भाव्यत्रुटेः अन्वेषणं कर्तुं राजस्व-मण्डलाधिकारी (RDO) स्तरे अन्वेषणस्य आदेशाः दत्ताः सन्ति।राष्ट्रपतिः द्रौपदी मुर्मु, उपराष्ट्रपतिः सी. पी. राधाकृष्णन् तथा च प्रधानमन्त्री नरेन्द्र मोदी अस्मिन् दुर्घटने दुःखं प्रकटितवन्तः। सामाजिक-माध्यमेषु (सोशल मीडिया) एकस्मिन् सन्देशे राष्ट्रपतिमहोदया शोकसन्तप्तपरिवारेभ्यः संवेदनां प्रकटितवती, आहतानां शीघ्रस्वास्थ्यलाभस्य कामनां च कृतवती। उपराष्ट्रपानुसारम् एषा घटना अतीव दुःखदा अस्ति, तेन च शोकाकुलपरिवारेभ्यः सहानुभूतिः प्रदर्शिता। प्रधानमन्त्रिणा मोदिना 'प्रधानमन्त्री-राष्ट्रिय-सहायता-कोषतः' मृतकानां परिश्रितेभ्यः लक्षद्वयं (२,००,०००) रूप्यकाणि तथा च आहतेभ्यः पञ्चाशत्सहस्रं (५०,०००) रूप्यकाणि अनुग्रहराशिं दातुं घोषणा कृता।

## राष्ट्रिय-परीक्षा-अभिकरणेन (NTA) जेईई-मेन् (JEE Main) द्वितीय-सत्रस्य परिणामाः उद्घोषिताः। अस्यां परीक्षायां कुलद्विलक्ष-पञ्चाशत्सहस्र-एकशत्यधिका-द्व्यशीतिः (२,५०,१८२) अभ्यर्थिनः जेईई-एड्वान्स्ड् (JEE Advanced) परीक्षायाः कृते योग्याः घोषिताः सन्ति